# ॥ कामाक्षी-माहात्म्यम् ॥

स्वामिपुष्करिणीतीर्थं पूर्वसिन्धुः पिनाकिनी।
शिलाह्रदश्चतुर्मध्यं यावत् तुण्डीरमण्डलम्॥ १ ॥

मध्ये तुण्डीरभूवृत्तं कम्पा-वेगवती-द्वयोः।
तयोर्मध्यं कामकोष्ठं कामाक्षी तत्र वर्तते॥ २ ॥

स एव विग्रहो देव्या मूलभूतोऽद्रिराड्भुवः।
नान्योऽस्ति विग्रहो देव्याः काञ्च्यां तन्मूलविग्रहः॥ ३ ॥

जगत्कामकलाकारं नाभिस्थानं भुवः परम्।
पदपद्मस्य कामाक्ष्याः महापीठमुपास्महे॥ ४ ॥

कामकोटिः स्मृतः सोऽयं कारणादेव चिन्नभः।
यत्र कामकृतो धर्मो जन्तुना येन केन वा।
सकृद् वाऽपि सुधर्माणां फलं फलति कोटिशः॥ ५ ॥

यो जपेत् कामकोष्ठेऽस्मिन् मन्त्रमिष्टार्थदैवतम्।
कोटिवर्णफलेनैव मुक्तिलोकं स गच्छति॥ ६ ॥

यो वसेत् कामकोष्ठेऽस्मिन् क्षणार्धं वा तदर्धकम्।
मुच्यते सर्वपापेभ्यः साक्षाद् देवी नराकृतिः॥ ७ ॥

गायत्रीमण्डपाधारं भूनाभिस्थानमुत्तमम्।
पुरुषार्थप्रदं शम्भोर्बिलाभ्रं तं नमाम्यहम्॥ ८ ॥

यः कुर्यात् कामकोष्ठस्य बिलाभ्रस्य प्रदक्षिणम्।
पदसङ्ख्याक्रमेणैव गोगर्भजननं लभेत्॥ ९ ॥

विश्वकारणनेत्राढ्यां श्रीमत्त्रिपुरसुन्दरीम्।
बन्धकासुरसंहन्त्रीं कामाक्षीं तामहं भजे॥ १० ॥

पराजन्मदिने काञ्च्यां महाभ्यन्तरमार्गतः।
योऽर्चयेत् तत्र कामाक्षीं कोटिपूजाफलं लभेत्।
तत्फलोत्पन्नकैवल्यं सकृत् कामाक्षिसेवया॥ ११ ॥

त्रिस्थाननिलयं देवं त्रिविधाकारमच्युतम्।
प्रतिलिङ्गाग्रसंयुक्तं भूतबन्धं तमाश्रये॥ १२ ॥

य इदं प्रातरुत्थाय स्नानकाले पठेन्नरः।
द्वादशश्लोकमात्रेण श्लोकोक्तफलमाप्नुयात्॥

॥ इति श्री-कामाक्षी-विलासे त्रयोविंशोऽध्याये श्री-कामाक्षी-माहात्म्यं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Kamakshi_Mahatmyam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits